# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-३ (SEM-6) | **प्रश्नपत्रम् – ८** | गुणाः - ७० |
| विषयः - साहित्यम् | CC-3.6.12 | समयः - ११ तः २ |
| दिनाङ्कः – २६/४/२०१६ | सन्दर्भग्रन्थः – किरातार्जुनीयम् (प्रथमसर्गः) | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **अधोलिखितश्लोकानां द्वयोः ससन्दर्भं मल्लिनाथसूरिटीकानुसारं व्याख्या कार्या ।** | ०८ |
| | (१) क्रियासु युक्तैर्नृप चारचक्षुषो, न वञ्चनीयाः प्रभवोऽनुजीविभिः ।<br>अतोऽर्हसि क्षन्तुमसाधु साधु वा, हितं मनोहारि च दुर्लभं वचः ॥<br>(२) तथापि जिह्मः स मवज्जिगीषया, तनोति शुभ्रं गुणसम्पदा यशः ।<br>सुमुन्नयन्मूर्तिमनार्यसङ्गमाद्, वरं विरोधोऽपि समं महात्मभिः ॥<br>(३) निरत्ययं साम न दानवर्जितं न भूरिदानं विरहप्य सत्क्रियाम् ।<br>प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥ | |
| **प्रश्नः -२** | **कस्याप्येकस्य परिचयात्मकमुत्तरं लिखन्तु ।** | ०८ |
| | (१) भारवेः जीवनपरिचयः ।<br>(२) दुर्योधनस्य शासनव्यवस्था वर्णयत । | |
| **प्रश्नः -३** | **द्वयोः टिप्पणी लेख्या ।** | ०४ |
| | (१) वनेचरः<br>(२) सुयोधनस्य त्रिगणः ।<br>(३) भारवेरर्थगौरवम् ।<br>(४) किरातार्जुनीयस्य शीर्षकसार्थक्यम् । | |
| **प्रश्नः - ४** | **पञ्चप्रश्नानाम् उत्तराणि एकैकवाक्यद्वारा लेख्यानि ।** | ०५ |
| | (१) वर्णालिङ्गी वनेचरः कुत्र ययौ ?<br>(२) नयेन पौरुषं केन वितन्यते ?<br>(३) प्रथमसर्गे कति श्लोकाः सन्ति ?<br>(४) प्रथमसर्गस्य श्लोकस्य किं वृत्तम् ?<br>(५) किरातार्जुनीयं पदस्य कोऽर्थः ?<br>(६) प्रथमसर्गस्य अन्तिमश्लोकस्य किं वृत्तम् ?<br>(७) महाकविः भारविः कस्य सम्प्रदायस्य आसीत् ? | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) विधायरक्षान् परितः परेतरानशङ्किताकारमुपैति शङ्कित्त ।<br>क्रियापवर्गेष्वनुजीविसात्कृताः कृताज्ञतामस्य वदन्ति सम्पदः ॥<br>(२) महीमृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः । | |

| | | |
|---|---|---|
| | महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ॥<br>(३) तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ।<br>परप्रणीतानि वयांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ॥ | |
| **प्रश्नः -६** | **कस्याप्येकस्य सारांशात्मकमुत्तरं लिखन्तु ।** | ०८ |
| | (१) प्रथमसर्गस्य सारांशः ।<br>(२) किरातार्जुनीयस्य कथासारः । | |
| **प्रश्नः -७** | **एका टिप्पणी लेख्या ।** | ०२ |
| | (१) सुयोधनस्य दण्डभेदनीतिः ।<br>(२) दुर्योधनस्य सेवकस्नेहः । | |
| **प्रश्नः -८** | **द्वयोरेकवाक्येन उत्तरं लिखत ।** | ०२ |
| | (१) मेदिनी शब्दस्य कोऽर्थः ?<br>(२) द्रुपदात्मजा का ?<br>(३) कस्य अर्थसम्पदः अनारतं फलन्ति ?<br>(४) महीभुजा शब्दस्य कोऽर्थः भवति ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -९** | **द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।<br>प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ॥<br>(२) इमामहं वेद न तावकीं धियं , विचित्ररूपा खलु चित्तवृत्तयः ।<br>विचिन्तयन्त्वा भवदापदं परां, रुजन्ति चेतः प्रसभं ममाधयः ॥<br>(३) न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ।<br>अरिषु हि विजयार्थिनः क्षितीशाः विदधति सोपधिसन्धिदूषणानि ॥ | |
| **प्रश्नः -१०** | **कस्याप्येकस्य वर्णनात्मकमुत्तरं लिखत ।** | ०८ |
| | (१) परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सवः एव मानिनाम् ।<br>(२) व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो स भूभृतः ॥ | |
| **प्रश्नः -११** | **टिप्पणीद्वय्ं लेख्यम् ।** | ०४ |
| | (१) द्रौपदी (२) भीमः (३) नकुलसहदेवौ (४) युधिष्ठिरः | |
| **प्रश्नः -१२** | **यथेच्छं पञ्चानामेकवाक्येन उत्तरं लिखत ।** | ०५ |
| | (१) द्रौपदी कस्मै कथयत्युपदेशवाक्यानि ?<br>(२) मुनयः शमेन किं लभन्ते ?<br>(३) अर्जुनेन किं जितम् ?<br>(४) चित्तवृत्तयः कीदृश्यः सन्ति?<br>(५) मनस्विता कीदृशी भूत्वा हता ?<br>(६) किरातार्जुनीये प्रधाननायकः कोऽस्ति ?<br>(७) विजयार्थिनः राजानः किं कुर्वन्ति ? | |

***